# Shri Bhadrakali Kavacham

# શ્રીભદ્રકાલીકવચમ્

## Document Information

Text title : bhadrakAlIkavacham 2

File name : bhadrakAlIkavacham2.itx

Category : kavacha, devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : bhairavItantra

Latest update : September 2

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# Shri Bhadrakali Kavacham

## શ્રીભદ્રકાલીકવચમ્

ૐ શ્રીદેવ્યુવાચ ।
ૐ ભગવન્કરુણામ્ભોધે શાસ્ત્રામ્ભો નિધિપારગઃ ।
ત્રૈલોક્યસારયેત્તત્ત્વં જગદ્રક્ષણકારકઃ ॥ ૧॥

ભદ્રકાલ્યા મહાદેવ્યાઃ કવચં મન્ત્રગર્ભકમ્ ।
જગન્મઙ્ગલદં નામ વદ શમ્ભો દયાનિધે ॥ ૨॥

શ્રી ભૈરવઃ ઉવાચ ।
ભૈમ્ભદ્રકાલી કવચં જગત્મઙ્ગલનામકમ્ ।
ગુહ્યં સનાતનં પુણ્યં ગોપનીયં વિશેષતઃ ॥ ૩॥

જગત્મઙ્ગલનામ્નોસ્ય કવચસ્ય ઋષિઃ શિવઃ ।
ઉષ્ણિક્છન્દઃ સમાખ્યાતં દેવતા ભદ્રકાલિકા ॥ ૪॥

ભૈં બીજં હૂં શક્તિઃ તથા સ્વાહા કીલકમુચ્યતે ।
ધર્માર્થ કામ મોક્ષાર્થે વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૫॥

અસ્ય શ્રી જગત્મઙ્ગલ નામ્નો ભદ્રકાલી કવચસ્ય શિવઋષિઃ,
ઉષ્ણિક્ છન્દઃ, શ્રીભદ્રકાલી દેવતા, ભૈં બીજં, હૂં શક્તિઃ,
સ્વાહા કીલકં, ધર્માર્થકામમોક્ષાર્થે કવચ પાઠે વિનિયોગઃ ।
અથ ધ્યાનમ્ ।
ઉદ્યશ્ચન્દ્રકલાવતંસિત શિખાં ક્રીઙ્કાર વર્ણૂજ્વલામ્ ।
શ્યામાં શ્યામમુખીં રવીન્દુ નયનાં હૂં વર્ણ રક્તાધરામ્ ॥ ૬॥

ભૈં બીજાઙ્કિત માનસાં શવગતાં નીલામ્બરોદ્ભાસિતામ્ ।
સ્વાહાલઙ્કૃત સર્વ ગાત્ર લતિકાં ભૈં ભદ્રકાલીં ભજે ॥ ૭॥

ૐ ભૈં પાતુ મે શિરો નિત્યં દેવી ભદ્રકાલિકા ।
લલાટં ક્રીં સદા પાતુ મહારત્નેશ્વરી તથા ॥ ૮॥

ક્રીં ભ્રુવૌ પાતુ મે નિત્યં મહાકામેશ્વરી તથા ।

નેત્રેવ્યાત્ ક્રીં ચ મે નિત્યં નિત્યાનન્દમયી શિવા ॥ ૯॥

ગણ્ડૌ મે પાતુ ભૈં નિત્યં સર્વલોકમહેશ્વરી ।
શ્રુતી હ્રીં પાતુ મે નિત્યં સર્વમઙ્ગલમઙ્ગલા ॥ ૧૦॥

નાસાં હ્રીં પાતુ મે નિત્યં મહાત્રિભુવનેશ્વરી ।
અધરે હૂં સદાવ્યાન્મે સર્વમન્ત્રમયી તથા ॥ ૧૧॥

જિહ્વાં ક્રીં મે સદા પાતુ વિશુદ્ધેશ્વરરૂપિણી ।
ભૈં હ્રીં હ્રીં મે રદાન્પાતુ નિત્યા ક્રીં કુલસુન્દરી ॥ ૧૨॥

હ્રીં હૂં ક્રીં મે ગલં પાતુ જ્વાલામણ્ડલમણ્ડના ।
હ્રીં હૂં ક્રીં મે ભુજૌ પાતુ ભવમોક્ષપ્રદામ્બિકા ॥ ૧૩॥

હ્રીં હૂં ક્રીં મે કરૌ પાતુ સર્વાનન્દમયી તથા ।
સ્તનૌ ક્રીં હૂં સદા પાતુ નિત્યા નીલપતાકિની ॥ ૧૪॥

ક્રીં ભૈં હ્રીં મમ વક્ષોવ્યાત્ બ્રહ્મવિદ્યામયી શિવા ।
ભૈં હૂં કુક્ષિં મે સદા પાતુ મહાત્રિપુરસુન્દરી ॥ ૧૫॥

ઐં સૌઃ ભૈં પાતુ મે પાર્શ્વૌ વિદ્યા ચતુર્દશાત્મિકા ।
ઐં ક્લીં ભૈં પાતુ મે પૃષ્ઠં સર્વમન્ત્રવિભૂષિતા ॥ ૧૬॥

ૐ ક્રીં ઐં સૌઃ સદાવ્યાન્મે નાભિં ભૈં બૈન્દવેશ્વરી ।
ૐ હ્રીં હૂં પાતુ શિશ્નં મે દેવતા ભગમાલિની ॥ ૧૭॥

હ્રીં હ્રીં હ્રીં મે કટિં પાતુ દેવતા ભગરૂપિણી ।
હૂં હૂં ભૈં ભૈં સદાવ્યાન્મે દેવી બ્રહ્મસ્વરૂપિણી ॥ ૧૮॥

ૐ ક્રીં હૂં પાતુ મે જાનૂ મહાત્રિપુરભૈરવી ।
ૐ ક્રીં ઐં સૌઃ પાતુ મે જઙ્ઘે બાલાશ્રીત્રિપુરેશ્વરી ॥ ૧૯॥

ગુલ્ફૌ મે ક્રીં સદા પાતુ શિવશક્તિસ્વરૂપિણી ।
ક્રીં ઐં સૌઃ પાતુ મે પાદૌ પાયાદ્ શ્રીકુલસુન્દરી ॥ ૨૦॥

ભૈં ક્રીં હૂં શ્રીં સદા પાતુ પાદાધઃ કુલશેખરા ।
ૐ ક્રીં હૂં શ્રીં સદાવ્યાન્મે પાદપૃષ્ઠં મહેશ્વરી ॥ ૨૧॥

ક્રીં હૂં શ્રીં ભૈં વપુ પાયાત્ સર્વં મે ભદ્રકાલિકા ।
ક્રીં હ્રીં હ્રીં પાતુ માં પ્રાતર્દેવેન્દ્રી વજ્રયોગિની ॥ ૨૨॥

હૂં ભૈં માં પાતુ મધ્યાન્હે નિત્યમેકાદશાક્ષરી ।
ૐ ઐં સૌઃ પાતુ માં સાયન્દેવતા પરમેશ્વરી ॥ ૨૩॥

નિશાદૌ ક્રીં ચ માં પાતુ દેવી શ્રીષોડશાક્ષરી ।
અર્ધરાત્રે ચ માં પાતુ ક્રીં હૂં ભૈં છિન્નમસ્તકા ॥ ૨૪॥

નિશાવસાન સમયે પાતુ માં ક્રીં ચ પઞ્ચમી ।
પૂર્વે માં પાતુ શ્રીં હ્રીં ક્લીં રાજ્ઞી રાજ્યપ્રદાયિની ॥ ૨૫॥

ૐ હ્રીં હૂં માં પશ્ચિમેવ્યાત્સર્વદા તત્ત્વરૂપિણી ।
ઐં સૌઃ માં દક્ષિણે પાતુ દેવી દક્ષિણકાલિકા ॥ ૨૬॥

ઐં ક્લીં મામુત્તરે પાતુ રાજરાજેશ્વરી તથા ।
વ્રજન્તં પાતુ માં શ્રીં હૂં તિષ્ઠન્તં ક્રીં સદાવતુ ॥ ૨૭॥

પ્રબુધં હૂં સદા પાતુ સુપ્તં માં પાતુ સર્વદા ।
આગ્નેયે ક્રીં સદા પાતુ નૈરૃત્યે હૂં તથાવતુ ॥ ૨૮॥

વાયવ્યે ક્રીં સદા પાયાદૈશાન્યાં ભૈં સદાવતુ ।
ઉર્ધ્વં ક્રીં માં સદા પાતુ હ્યધસ્તા હ્રીં તથૈવતુ ॥ ૨૯॥

ચૌરતોપાગ્નિભીતિભ્યઃ પાયાન્માં શ્રીં શિવેશ્વરી ।
યક્ષભૂતપિશાચાદિ રાક્ષસેભ્યોવતાત્સદા ॥ ૩૦॥

ઐં ક્લીં સૌઃ હૂં ચ માતઙ્ગીચોચ્છિષ્ટપદરૂપિણી ।
દૈત્યભૂચરભીતિભ્યોવતાદ્ દ્વાવિંશદક્ષરી ॥ ૩૧॥

વિસ્મારિતં તુ યત્સ્થાનં યત્સ્થાનં નામવર્જિતમ્ ।
તત્સર્વં પાતુ મે નિત્યં દેવી ભૈં ભદ્રકાલિકા ॥ ૩૨॥

ઇતીદં કવચં દેવિ સર્વમન્ત્રમયં પરમ્ ।
જગત્મઙ્ગલનામેદં રહસ્યં સર્વ કામિકમ્ ॥ ૩૩॥

રહસ્યાતિ રહસ્યં ચ ગોપ્યં ગુપ્તતરં કલૌ ।
મન્ત્રગર્ભં ચ સર્વસ્વં ભદ્રકાલ્યા મયાસ્મૃતમ્ ॥ ૩૪॥

અદૃષ્ટવ્યમવક્તવ્યં અદાતવ્યમવાચિકમ્ ।
અશ્રોતવ્યમિદં વર્મ દીક્ષાહીનાય પાર્વતિ ॥ ૩૫॥

અભક્તેભ્યોપિપુત્રેભ્યો દત્વા નરક માપ્નુયાત્ ।
દાતવ્યમભક્તેભ્યો ભક્તેભ્યો દીયતે સદા ॥ ૩૬॥

મહાદારિદ્ય્ર શમનં મહામઙ્ગલવર્ધનમ્ ।
ભૂર્જત્વચિ લિખેદ્દેવિ રોચના ચન્દનેન ચ ॥ ૩૭॥

શ્વેતસૂત્રેણ સંવેષ્ટ્ય ધારયેન્મૂર્ધ્નિ વા ભુજે ।
મૂર્ધ્નિ ધૃત્વા ચ કવચં ત્રૈલોક્યવિજયં ભવેત્ ॥ ૩૮॥

ભુજે ધૃત્વા રિપુઞ્જિત્વા રણે જયમવાપ્નુયાત્ ।
ઇતીદં કવચં દેવિ મૂલમન્ત્રૈક સાધનમ્ ॥ ૩૯॥

ગુહ્યં ગોપ્યં પરં પુણ્યં ગોપનીય સ્વયોનિવત્ ।

॥ ઇતિ શ્રીભૈરવીતન્ત્રે ભદ્રકાલીકવચં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Ravin Bhalekar ravibhalekar at hotmail.com

*Shri Bhadrakali Kavacham*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*